## ॥ श्री यंत्रोद्धारक स्तुति: ॥

नमामि दूतं रामस्य ।
सुखदं च सुरद्रुमम् ।
पीनव्रत्तमहाबाहुं ।
सर्वशत्रुनिवारणम् ॥१॥

नानारत्नसमायुक्त ।
कुंडलादि विराजितं ।
सर्वदाभीष्टदातारं ।
सतां वै द्रढमाहवे ॥२॥

वासिनं चक्रतीर्थस्य ।
दक्षिणस्थगिरौसदा ।
तुंगांबोधितरंगस्य ।
वातेन परिशोभिते ॥३॥

नानादेशागतैस्सध्भि: ।
सेव्यमानं न्रपोत्तमै: ।
धूप दीपादि नैवेद्यै: ।
पंचखाद्यैश्च शक्तित: ॥४॥

भजामि श्री हनूमंतम् ।
हेमकांति समप्रभं ।
व्यासतीर्थ यतींद्रेण ।
पूजितं प्रणिधानत: ॥५॥

त्रिवारं यः पठेन्नित्यं ।
स्तोत्रं भक्त्याद्विजोत्तमः ।
वांचितं लभ्यतेऽभीष्टं ।
षण्मासाभ्यंतरे खलु ॥६॥

पुत्रार्थी लभते पुत्रं ।
यशार्थी लभते यशः ।
विद्यार्थी लभते विद्यां ।
धनार्थी लभते धनं ॥७॥

सर्वथा मास्तुसंदेहो ।
हरिःसाक्षी जगत्पतिः ।
यः करोत्यत्र संदेहं ।
स याति नरकं ध्रुवम् ॥८॥